# द्वितीय : पाठः रघुकौत्ससंवादः

© JCERT not to be republished

**संस्कृतभाषया उत्तरत–**

(क) कौत्सः कस्य शिष्यः आसीत्?

उत्तर– वरतन्तोः।

(ख) रघुः कम् अध्वरम् अनुतिष्ठति स्म?

उत्तर– विश्वजित्।

(ग) कौत्सः किमर्थं रघुं प्राप?

उत्तर–धनं याचितुम्।

(घ) मंत्रकृताम् अग्रणी कः आसीत्?

उत्तर–वरतन्तुः।

(ङ.) कौत्सस्य गुरूः गुरूदक्षिणात्वेन कियद्धनम् देयमिति आदिदेश?

उत्तर–चतुर्दशकोटिः धनम्।

**पठितावबोधनम्**

तमध्वरे विश्वजिति क्षितीशं,
निःशेषविश्राणितकोषजातम्।
उपातविद्योगुरूदक्षिणार्थी,
कौत्सः प्रपेदे वरतन्तु शिष्यः।।

उपर्युक्तं पद्याशं पठित्वा एतदाधारितप्रश्नाननामुतराणि यथानिर्देशं लिखत–

(क) एकपदेन उतरत–

1. वरतन्तोः शिष्यः कः अस्ति?

उत्तर–कौत्सः

2. क्षितीशः कस्मिन् समग्रकोषं दत्तवान्?

उत्तर– विश्वजिति अध्वरे।

(ख.) पूर्ण वाक्येन उत्तरत–

कौत्सः कीदृशस्य क्षितीशस्य समीपे गतवान् ?

उत्तर–कौत्सः विश्वजिति अध्वरे निःशेषविश्राणितकोषजातस्य क्षितीशस्य
समीपे गतवान् ।

**विकल्पेभ्यः उचितम् उत्तरं चिनुत**

1. 'विश्वजित्' इति विशेषणस्य विशेष्यपदं किम् ?

(अ) अध्वरे (ब) निःशेष
(स) क्षितीशम् (द) कौत्सः

उत्तर– अ. अध्वरे

2. 'प्रपेदे' इति क्रियापदस्य पद्यांशे कर्तृपदं किम् ?

(अ) कोषजातम् (ब) तम्
(स) कौत्सः (द) क्षितीश

उत्तर–स. कौत्सः

3. अस्मिन् पद्ये 'तम्' इति सर्वनामपदस्य संज्ञा पदम् किम?

(अ) अध्वर (ब) क्षितीशम्
(स) कौत्सः (द) वरतन्तुशिष्यः

उत्तर–ब. क्षितीशम्

4. 'यज्ञे' इत्यर्थ पदस्य अत्र कः पर्यायः?

(अ) निःशेषे (ब) क्षितीशम्
(स) विश्वजिति (द) अध्वरे

उत्तर–द. अध्वरे

<u>पठितावबोधनम् कार्यम्</u>

सर्वत्र नो वार्तम वेहि राजन्!
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ।

(क.) एकपदेन उत्तरत –

1. नाथे सति केषाम् अशुभं न भवति ?

उत्तर–प्रजानाम्

2. तमिस्रा कस्य दृष्टिं अवरूद्धं करोति ?

उत्तर–लोकस्य

ख. पूर्णवाक्येन उत्तरत –

1. सूर्ये तपति किं भवति ?

उत्तर–सूर्ये तपति अंधकारः लोकस्य दृष्टिम् अवरोद्धुं न शक्नोति।

ग. विकल्पेभ्यः उचितम् उत्तरं चिनुत –

1. 'सूर्ये' इत्यस्य क्रियापदं किमस्ति ?

(अ) कल्पेत (ब) तपति
(स) अवेहि (द) आवरणाय

उत्तर–ब. तपति

2. 'त्वयि' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) कौत्साय (ब) सूर्याय
(स) अंधकाराय (द) रघवे

उत्तर–द. रघवे

3. 'शुभम्' इत्यस्य पद्यांशे विलोमपदं किम्?

(अ) अशुभम् (ब) अमंगलम्
(स) आवरणम् (द) तमिस्रा

उत्तर–अअशुभम्

4. 'अंधकारः' इत्यस्य पद्यांशे पर्यायपदं किम्?

(अ) आवरणम (ब) दृष्टेः

(स) तमिस्राः (द) कल्पेत

उत्तर– स. तमिस्राः

"सर्वत्र नो वार्तम वेहि राजन्
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टे
कल्पेत लोकस्य कथं तमिस्रा।।"

उपर्युक्त पद्याशं आधृत्य अन्वयं निर्माणं कुरूत–

अन्वय – राजन् ! त्वम् सर्वत्र नः वार्तम् अवेहि। त्वयि नाथे सति प्रजानां अशुभं कुतः? सूर्ये तपति सति तमिस्रा लोकस्य दृष्टे आवरणाय कथं कल्पेत ।

मंञ्जूषायाः सहायतायाः अन्वयं पूर्ति कुरूत –

मंञ्जूषा– प्रजानाम् , लोकस्य, सर्वत्र, तपति

अन्वय–राजन्, त्वम . . . . . . . . नः वार्तम् अवेहि ।
त्वयि नाथे सति . . . . . . . . . . अशुभम् कुतः ?
सूर्ये . . . . . . सति तमिस्रा . . . . . . . . . . दृष्टेः
आवरणाय कथं कल्पेत् ।

उत्तर– सर्वत्र , प्रजानाम् , तपति, लोकस्य ।

अधोलिखितरचनानाम् लेखकानां नामानि लिखतः–

| | रचना | | रचनाकाराः |
|---|---|---|---|
| (क) | पंचतंत्रम् | – | विष्णु शर्मा |
| (ख) | रामायणम् | – | महर्षि वाल्मीकिः |
| (ग) | मुद्राराक्षसम् | – | विशाखदत्तः |
| (घ) | अभिज्ञानशाकुन्तलम् | – | महाकविः कालिदासः |
| (ड़) | महाभारतम् | – | महर्षिः वेदव्यासः |
| (च) | हितोपदेशम् | – | नारायणपण्डितः |
| (छ) | शिवराजविजयम् | – | अम्बिकादत्तः व्यासः |
| (ज) | रघुवंशम् | – | महाकविः कालिदासः |
| (झ) | शिशुपालवधम् | – | महाकविः माघः |
| (ञ) | किरातार्जुनीयम् | – | महाकविः भारविः |
| (ट) | नीतिशतकम् | – | भर्तृहरिः |
| (ठ) | ऋतुसंहारम् | – | महाकविः कालिदासः |
| (ड) | गीतगोविन्दम् | – | जयदेवः |
| (ढ) | कादम्बरी | – | बाणभट्टः |
| (ण) | दशकुमारचरितम् | – | दण्डीः |
| (त) | बुद्धचरितम् | – | अश्वघोषः |
| (थ) | मृच्छकटिकम् | – | शूद्रकः |
| (द) | महावीरचरितम् | – | भवभूतिः |
| (ध) | उत्तररामचरितम् | – | भवभूतिः |
| (न) | वेणीसंहार | – | भट्टनारायणः |
| (प) | शुकनासोपदेशः | – | बाणभट्टः |

© JCERT not to be republished